# Shri Ganesha Aparadhaxamapanastotram

# શ્રીગણેશાપરાધક્ષમાપણસ્તોત્રમ્

## Document Information

Text title : gaNeshaaparAdhaxamApanastotram

File name : shrIgaNeshaaparAdhaxamApanastotram.itx

Category : aparAdhakShamA, ganesha

Location : doc_ganesha

Author : Traditional

Transliterated by : Karthik Chandan.P (kardan5380 at yahoo.com) : Amith K Nagaraj)

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : mudgalapurANe

Latest update : September 17, 2004

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 21, 2020

*sanskritdocuments.org*

Shri Ganesha Aparadhaxamapanastotram

# શ્રીગણેશાપરાધક્ષમાપણસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।

સુમુખો મખભુઙ્મુખાર્ચિતઃ સુખવૃદ્ધ્યૈ નિખિલાર્તિશાન્તયે।
અખિલશ્રુતિશીર્ષવર્ણિતઃ સકલાદ્યઃ સ સદાઽસ્તુ મે હૃદિ ॥ ૧॥

પ્રણવાકૃતિમસ્તકે નયઃ પ્રણવો વેદમુખાવસાનયોઃ।
અયમેવ વિભાતિ સુસ્ફુટં હ્યવતારઃ પ્રથમઃ પરસ્ય સઃ ॥ ૨॥

પ્રથમં ગુણનાયકો બભૌ ત્રિગુણાનાં સુનિયન્ત્રણાય યઃ।
જગદુદ્ભવપાલનાત્યયેષ્વજવિષ્ણ્વીશસુરપ્રણોદકઃ ॥ ૩॥

વિધિવિષ્ણુહરેન્દ્રદેવતાદિગણાનાં પરિપાલનાદ્વિભુઃ।
અપિ ચેન્દ્રિયપુઞ્જચાલનાદ્ગણનાથઃ પ્રથિતોઽર્થતઃ સ્ફુટમ્ ॥ ૪॥

અણિમામુખસિદ્ધિનાયકા ભજતઃ સાધયતીષ્ટકામનાઃ।
અપવર્ગમપિ પ્રભુર્ધિયો નિજદાસસ્ય તમો વિહૃત્ય યઃ ॥ ૫॥

જનનીજનકઃ સુખપ્રદો નિખિલાનિષ્ટહરોઽખિલેષ્ટદઃ।
ગણનાયક એવ મામવેદ્રદપાશાङ્કુશમોદકાન્ દધત્ ॥ ૬॥

શરણં કરુણાર્ણવઃ સ મે શરણં રક્તતનુશ્ચતુર્ભુજઃ।
શરણં ભજકાન્તરાયહા શરણં મઙ્ગલમૂર્તિરસ્તુ મે ॥ ૭॥

સતતં ગણનાયકં ભજે નવનીતાધિકકોમલાન્તરમ્।
ભજનાદ્ભવભીતિભઞ્જનં સ્મરણાદ્વિઘ્નનિવારણક્ષમમ્ ॥ ૮॥

અરુણારુણવર્ણરાજિતં તરુણાદિત્યસમપ્રભં પ્રભુમ્।
વરુણાયુધમોદકાવહં કરુણામૂર્તિમહં પ્રણૌમિ તમ્ ॥ ૯॥

ક્વ નુ મૂષકવાહનં પ્રભું મૃગયે ત્વજ્ઞતમોઽવનીતલે।
વિબુધાસ્તુ પિતામહાદયસ્ત્રિષુ લોકેષ્વપિ યં ન લેભિરે ॥ ૧૦॥

શરણાગતપાલનોત્સુકં પરમાનન્દમજં ગણેશ્વરમ્।

વરદાનપટું કૃપાનિધિં હૃદયાબ્જે નિદધામિ સર્વદા ॥ ૧૧॥

સુમુખે વિમુખે સતિ પ્રભૌ ન મહેન્દ્રાદપિ રક્ષણં કદા।
ત્વયિ હસ્તિમુખે પ્રસન્નતાઽભિમુખેનાપિ યમાદ્ભયં ભવેત્ ॥ ૧૨॥

સુતરાં હિ જડોઽપિ પણ્ડિતઃ ખલુ મૂકોઽપ્યતિવાક્પતિર્ભવેત્।
ગણરાજદયાર્દ્રવીક્ષણાદપિ ચાજ્ઞઃ સકલજ્ઞાતામિયાત્ ॥ ૧૩॥

અમૃતં તુ વિષં વિષં સુધા પરમાણુસ્તુ નગો નગોઽપ્યણુઃ।
કુલિશં તુ તૃણં તૃણં પવિર્ગણનાથાશુ તવેચ્છયા ભવેત્ ॥ ૧૪॥

ગતોઽસિ વિભો વિહાય માં નનુ સર્વજ્ઞ ન વેત્સિ માં કથમ્।
કિમુ પશ્યસિ વિશ્વદૃઙ્ ન માં ન દયા કિમપિ તે દયાનિધે ॥ ૧૫॥

અયિ દીનદયાસરિત્પતે મયિ નૈષ્ઠુર્યમિદં કુતઃ કૃતમ્।
નિજભક્તિસુધાલવોઽપિ યન્ન હિ દત્તો જનિમૃત્યુમોચકઃ ॥ ૧૬॥

નિતરાં વિષયોપભોગતઃ ક્ષપિતં ત્વાયુરમૂલ્યમેનસા।
અહહાજ્ઞતમસ્ય સાહસં સહનીયં કૃપયા ત્વયા વિભો ॥ ૧૭॥

ભગવન્નહિ તારકસ્ય તે વત મન્ત્રસ્ય જપઃ કૃતસ્તથા।
ન કદૈકધિયાપિ ચિન્તનં તવ મૂર્તેસ્તુ મયાતિપાપ્મના ॥ ૧૮॥

ભજનં ન કૃતં સમર્ચનં તવ નામસ્મરણં ન દર્શનમ્।
હવનં પ્રિયમોદકાર્પણં નવદૂર્વા ન સમર્પિતા મયા ॥ ૧૯॥

નચ સાધુસમાગમઃ કૃતસ્તવ ભક્તાશ્ચ મયા ન સત્કૃતાઃ।
દ્વિજભોજનમપ્યકારિ નો વત દૌરાત્મ્યમિદં ક્ષમસ્વ મે ॥ ૨૦॥

ન વિધિં તવ સેવનસ્ય વા નચ જાને સ્તવનં મનું તથા।
કરયુગ્મશિરઃસુયોજનં તવ ભૂયાદ્ગણનાથપૂજનમ્ ॥ ૨૧॥

અથ કા ગણનાથ મે ગતિર્નહિ જાને પતિતસ્ય ભાવિની।
ઇતિ તપ્તતનું સદાઽવ મામનુકમ્પાર્દ્રકટાક્ષવીક્ષણૈઃ ॥ ૨૨॥

ઇહ દણ્ડધરસ્ય સઙ્ગમેઽખિલધૈર્યચ્યવને ભયઙ્કરે।
અવિતા ગણરાજ કો નુ માં તનુપાતાવસરે ત્વયા વિના ॥ ૨૩॥

વદ કં ભવતોઽન્યમિષ્ટદાચ્છરણં યામિ દયાધનાદૃતે।
અવનાય ભવાગ્નિભર્જિતો ગતિહીનઃ સુખલેશવર્જિતઃ ॥ ૨૪॥

શ્રુતિમૃગ્યપથસ્ય ચિન્તનં કિમુ વાચોઽવિષયસ્ય સંસ્તુતિમ્।
કિમુ પૂજનમપ્યનાકૃતેરસમર્થો રચયામિ દેવતે ॥ ૨૫॥

કિમુ મદ્વિકલાત્સ્વસેવનં કિમુ રઙ્ગાદુપચારવૈભવમ્।
જડવાઙ્મતિતો નિજસ્તુતિં ગણનાથેચ્છસિ વા દયાનિધે ॥ ૨૬॥

અધુનાપિ ચ કિં દયા ન તે મમ પાપાતિશયાદિતીશ ચેત્।
હૃદયે નવનીતકોમલે ન હિ કાઠિન્યનિવેશસમ્ભવઃ ॥ ૨૭॥

વ્યસનાર્દિતસેવકસ્ય મે પ્રણતસ્યાશુ ગણેશ પાદયોઃ।
અભયપ્રદહસ્તપઙ્કજં કૃપયા મૂર્ધ્નિ કુરુષ્વ તાવકમ્ ॥ ૨૮॥

જનનીતનયસ્ય દૃક્પથં મુહુરેતિ પ્રસભં દયાર્દ્રધીઃ।
મમ દૃગ્વિષયસ્તથૈવ ભો ગણનાથાશુ ભવાનુકમ્પયા ॥ ૨૯॥

ગજરાજમુખાય તે નમો મૃગરાજોત્તમવાહનાય તે।
દ્વિજરાજકલાભૃતે નમો ગણરાજાય સદા નમોઽસ્તુ તે ॥ ૩૦॥

ગણનાથ ગણેશ વિઘ્નરાટ્ શિવસૂનો જગદેકસદ્ગુરો।
સુરમાનુષગીતમદ્યશઃ પ્રણતં મામવ સંસૃતેર્ભયાત્ ॥ ૩૧॥

જય સિદ્ધિપતે મહામતે જય બુદ્ધીશ જડાર્તસદ્ગતે।
જય યોગિસમૂહસદ્ગુરો જય સેવારત કલ્પનાતરો ॥ ૩૨॥

તનુવાગ્ હૃદયૈરસચ્ચ સદ્યદનસ્થાત્રિતયે કૃતં મયા।
જગદીશ કરિષ્યમાણમપ્યખિલં કર્મ ગણેશ તેઽર્પિતમ્ ॥ ૩૩॥

ઇતિ કૃષ્ણમુખોદ્ગતં સ્તવં ગણરાજસ્ય પુરઃ પઠેન્નરઃ।
સકલાધિવિવર્જિતો ભવેત્સુતદારાદિસુખી સ મુક્તિભાક્ ॥ ૩૪॥

ઇતિ મુદ્ગલપુરાણન્તર્વર્તિ શ્રીગણેશાપરાધક્ષમાપણસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by Karthik Chandan.P (kardan5380@yahoo.com)
and Amith K Nagaraj (amithkn@rediffmail.com)
Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*Shri Ganesha Aparadhaxamapanastotram*

pdf was typeset on November 21, 2020

Please send corrections to *sanskrit@cheerful.com*